**अश्वयुज्** स्त्री अश्वेन हयमुखाकारेण युज्यते युज–क्विप्। १अश्विनीनक्षत्रे तस्य तथाकारत्वमश्लेषाशब्दे उक्तम्। अश्वयुजि जातः अण् तस्य वा लुक्। अश्वयुक् २तन्नक्षत्रजाते त्रि० लुगभावे आश्वयुजः स्त्रियां ङीप्। अश्वेन हयाकारवता नक्षत्रेण युज्यते पौर्णमास्यस्मिन् मासे आधारे क्विप्। ३चान्द्राश्विनमासे "अश्वयुक्कृष्णपक्षस्य श्राद्धं कुर्य्याद्दिनेदिने" स्मृतिः। अश्वेन नक्षत्रेण युक् पौर्णमासी अस्त्यस्य अर्श० अच्। अश्वयुजोऽप्यत्र रत्नमाला० अश्वयुजा युक्ता पौर्णमास्यस्मिन् प्रज्ञा० अण् आश्वयुजोऽप्यत्र। कर्म्मणि क्विप्। अश्वेन युक्ते ४रथादौ। अश्वेन युनक्ति रथम् कर्त्तरि क्विप्। रथादौ ५अश्वयोजके त्रि०। "वयोवृधो अश्वयुजः परिज्रयः" ऋ०भा०५,५४,२।

**अश्वरक्षक** पु० अश्वं रक्षति रक्ष–ण्वुल्। घोटकपालके।

**अश्वरत्न** न० अश्वोरत्नमिव उपमि०स०। उच्चैःश्रवसि तस्य हयश्रेष्ठत्वात्तथात्वम् "मथ्यमानेऽमृते जातमश्वरत्नमनुत्तमम्" भा० आ०प० १७अ०। हयरत्नादयोऽप्यत्र "हयरत्नमहारि च" कुमा०।

**अश्वरथ** पु० अश्वयुक्तोरथः। १अश्वयुक्ते रथे। गन्धमादनसन्निकृष्टायाम् २नद्यां स्त्री। "पञ्चवर्षाणि पुण्याणि पाल्यन्ते भरतर्षभ!। प्रत्यक्षं सर्वभूतानां नदीमश्वरथां प्रति" भा० व०प० १६०अ०।

**अश्वराज** पु० अश्वानां राजा श्रेष्ठत्वात् टच्। उच्चैःश्रवसि "यत्र जज्ञे महावीर्य्यः सोऽश्वराजो महाद्युति" भा० आ०प०१७अ०। भगवद्विभूतित्वादपि तस्य श्रेष्ठत्वम् "उच्चैःश्रवसमश्वानां विद्धि याममृतोद्भवम्" गीता।

**अश्वरोधक** पु० अश्वं रुणद्धि रुध–ण्वुल्। करवीरे वृक्षे।

**अश्वरोह** पु० अश्वं रोहति रुह–अण् उप०स०। अश्वारोहे सादिनि।

**अश्वल** त्रि० अश्वं लाति ला–क ६त०। १हयग्राहके ऋषिभेदे "अथ ह जनकस्य वैदेहस्य होताश्वलो बभूव" वृ०उ०। तदृषेः याज्ञवल्क्यं प्रति प्रश्नप्रतिवचनरूपाख्यायिकाप्रतिपादके २ब्राह्मणे च तच्च "अथ ह जनकस्येत्यारभ्य ततो हो ताश्वलोविरराममित्यन्तम्" वृ०उ०। गोत्रापत्ये नडा० फक्। आश्वलायनः। तद्गोत्रापत्ये येन श्रौतसूत्रं गृह्यसूत्रञ्च कृतम् तस्मिन्।

**अश्वलक्षण** न० अश्वानां शुभाशुभज्ञापकत्वं लक्ष्यतेऽनेन लक्ष–करणे ल्युट् ६त०। अश्वस्य शुभाशुभसूचकचिह्नभेदे अश्वशब्दे तच्चोक्तम्।

**अश्वललित** न० वृत्तरत्नाकरोक्ते त्रयोविंशत्यक्षरपादके वर्णवृत्तभेदे "यदि ह नजौ भजौभजभलगास्तदाश्वललितं हरार्कयतिमत्"। इदमद्रितनयेति छन्दोम०।

**अश्वलाला** स्त्री अश्वस्य लालेवाकृत्या। ब्रह्मसर्पे हलाहलसर्पे जटाध०। अश्वलोमेति पाठान्तरम्। "अश्वस्य लोमेवाकृतिरस्य" तत्र विग्रहः।

**अश्ववक्त्र** पु० अश्वस्य वक्त्रमिव वक्त्रमस्य। १किम्पुरुषे देवयोनिभेदे अश्ववदनहयमुखादयोऽप्यत्र। २हयग्रीवे विष्णुमूर्त्तिभेदे अश्वशिरःशब्दे विवृतिः। तद्ध्यानेन च तन्मूर्त्तिरुक्ता तन्त्रसा०। "शरच्छशाङ्कप्रभमश्ववक्त्रं मुक्तामयैराभरणैः प्रदीप्तम्। रथाङ्गशङ्खाञ्चितबाहुयुग्मं जानुद्वयन्यस्तकरं भजामः"।

**अश्ववत्** त्रि० अश्वोऽस्त्यस्य मतुप् मस्य वः। १अश्वयुक्ते। "दधानो गोमदश्ववत् सुवीर्य्यम्" ऋ० ८,४६,५। मन्त्रे क्वचित् दीर्घः अश्वावान्। "भोजनमश्वावन्तं गोमन्तमापशुं नरः" ऋ० १,८३,४। अश्वे इव अश्वस्येव वा वति। २हयसदृशे अव्य०। अश्वेन तुल्यं क्रिया वति। ३हयकृतक्रियातुल्यक्रियायाम् अव्य०। अश्वमर्हति वति। ४हयार्हे अव्य०।

**अश्ववह** पु० अश्वेन उह्यते वह–कर्म्मणि बा अच्। हये- [नोह्रे सादिनि।

**अश्ववार** पु० अश्वं वारयति वृ०णिच्–अण् उप०स०। हयनिवारके सादिनि "दुःखेन निश्चक्रमुरश्ववाराः" माघः। ण्वुल्। अश्ववारकः तत्रैव। ल्यु अश्ववारणोऽप्यत्र। अश्ववारलक्षणादिकमुक्तमश्वशास्त्रे यथा "ब्राह्मणान् शक्तिदानेन साम्ना चैव तु क्षत्रियान्। वैश्यं दण्डेन शब्देन शूद्रं दण्डेन वाहयेत्। प्रत्यूषे वाहयेद्विप्रं क्षत्रियं प्रहरे गते। वैश्यं संध्यागते काले शूद्रं रात्रौ च वाहयेत्। सत्वं च त्रिविधं प्रोक्तमुत्तमाधममध्यमम्। उत्तमं चोपशासेन साम्ना दण्डेन मध्यमम्। शब्दाङ्केन च दण्डेन वाहयेदधमम्बुधः। सहजे निर्म्मले वाहे तैलदुग्धस्य रूपवान्। शालिश्च द्विविधा प्रोक्ता बलदौर्वल्यसम्भवा। बलिष्ठो दुर्बलत्वेन दुर्बलोऽपि बलेन वा। छलेनोपाधिकायांश्च सत्वं ज्ञात्वा च वाहयेत्। सार्द्रां सुकठिनां चैव पाषाणोदकसंयुताम्। तृणकाष्ठसमायुक्तां रङ्गभूमिं तु वर्ज्जयेत्। समां च विपुलां चैव किञ्चित्पांशुसमन्विताम्। एकान्ते विजने रम्ये रङ्गभूमिं तु कारयेत्। स्थूलः क्रोधी च मूर्खश्च चित्तोत्सुकश्चलासनः। अस्थाने दण्डपाती यो वाजी तस्य न सिध्यति। प्रचलति यस्य कटिरूर्द्ध्वं बाहुर्दण्डपातः। न